1.2.3

## शामृहिकमुक्तान्तर्जालपाठ्यक्रमस्य अभिज्ञानम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये अन्तर्जालाधारितःदूरस्थशिक्षणस्य विधिः अनेकैःप्रकारकैः अनुष्ठितो विधते। अस्य खलु कार्यक्रमस्य निर्मितिरेव अल्पसाधनसत्वे विविधसंस्थानेभ्यः छात्राः अध्यापकश्च विविधक्षेत्रीयज्ञानवन्तः भवेयुरिति ध्यिा विर्निर्मितोऽस्ति।

पारम्परिके खल्वस्मिन् विश्वविद्यालये प्रस्तुताधुनिकाविधि मादाय नैकधाः कार्यक्रमाः समायोजिताः वर्तन्ते। समग्रे खलु कोरोनाकाले प्रतयक्षविधिनाध्यनाध्यापन पिधानेन छात्राध्यापकेषु विद्याप्रसारणव्यवस्था विगलिता जातासीत् तत्क्षणे सम्पूर्णानन्दसंस्कृत विश्वविद्याल द्वारा अन्तर्जालमाध्यममाश्रित्य विविधविभागीयपाठ्यक्रमेषु संस्थापितानां पाठ्यग्रन्थानां विविधैः अध्यापकैः अध्ययनाध्यापनं सतर्कं कृतं विधते। प्रौढियाध्यमद्वारा पाठितानां प्रकरणानां Facebook, Youtube, Whatsapp समूहप्रभृतिभिः देशवैदेशिकानां शास्त्रपिपासूनां कृते शास्त्रज्ञानप्रचारः कृतो विधते। द्वारा पाठितानां विषयानुगुणं आरेख सौकर्यार्थं प्रदीयते।

एतेषां सर्वेषां पाठ्यंशानां पुनः दर्शनार्थ संरक्षणार्थञ्च विश्वविद्यालयस्य आधिकारिकं Youtube तन्त्रमपि निर्मितमस्ति। Mooc सदृशमेव अन्तर्जालाधारिते पाठ्यक्रमे सम्पूर्णानन्द संस्कृतविश्वविद्यालयेन शास्त्रप्रचार प्रसाराय अन्यसंस्थास्य छात्राणां ज्ञानविज्ञान विवर्धनाय विविधनाम्ना अनेके प्रकल्पाः साफल्येन संचालिताः। तेषामत्रक्रमेण किञ्चिद्विवरणं प्रस्तूयते।

(1) वैदिक विज्ञानमालाप्रकल्पे अनेकमेषा ख्यातिलब्धानां विदुषां वेद-वेदाङ्गदर्शनप्रथितविद्या समाश्रित्य व्याख्यानि अभवन् । तत्र तस्यां शृङ्खलायां पञ्चाशत् व्याख्यानि खलु परिगणितानि विधन्ते। तत्र खलु व्याख्याने वेदेन केवलं मन्त्राणां व्याख्यानमपितु मन्त्रस्थानां वैज्ञानिकतत्वानामुद्भावन वेदविद्या विचक्षणे अकारि। इयं खलु ज्ञानमाला विद्वमण्डले छात्रचये च सातिशयप्रसिद्धा अभवत् ।

(2) भारतीयज्ञानवैभवसमुल्लासः- अस्मिन् खलु उपक्रमे भारतीयज्ञानवैभवसमुल्लासः इति नाम्ना अन्तर्जालविधिना ख्यातिलब्धैः विद्वज्जनै भारतीयज्ञानविस्फोरणाय अनेकानि व्याख्यानानि अभवन् । तत्र छात्राः स्वसंस्थानीया अपरसंस्थानीयाः रूचिपूर्वकमधीतवनतः। इत्थं भारतीय ज्ञानवैभासमुल्लासकोऽपि उपक्रमः कीर्तनीयः वर्तते।

(3) शामृहिक अन्तर्जाल प्रकाल्प द्वारा ज्ञानचर्चा इति नाम्ना शास्त्रेषु विद्यमानानां प्राचीनज्ञानवैभवानां आधुनिकज्ञानद्वारातोलनं विद्या महीयसी (गभीरा) चर्चा सञ्जाता।

तस्यां चर्चायां आधुनिकव्यवहारोपयोगिनी विद्या अपि छात्रैः अध्यापकैश्च सर्वसाधरणैश्च समाधिगता वस्तुतः विश्वविद्यालयस्यास्य पाठ्यक्रमेष पाठ्योशरूपेण स्थापितशीर्षकबिन्दवः आधुनिकदृष्ट्या चर्चायाः विषयाः आसन् । यथा-भगवद्गीतायाः दार्शनिकी दृष्टिः नवधाभक्तिविमर्शः श्रीमद् भगवतपरिचर्चा, रामचरिताश्रितोद्बोधनप्रभृतयः प्रकल्पाः अनुष्ठिताः।

(4) श्रुतिनिस्स्वननामके अन्तर्जालप्रकल्पे वेदेषु विशेषतः सामवेदस्य मन्त्राणां अरोहावरोहक्रमेण उच्चारणविधेः पाठः संकल्पितो विद्यते। तत्र पाठद्वयं प्रसिद्धं वर्तते- प्रकृतिपाठः विकृतिपाठश्च। यद्यपि मन्त्रोच्चारणविधेः पाठनपाठनं प्रतयक्षविधिना भवति स्म। किन्तु प्रथमबारं विश्वविद्यालयोऽयमन्तर्जालमाध्येन सामोधं अस्यविधेः पाठनपाठनमकरोत् । तत्र संहितापाठे अष्टविकृतिपाठानां अन्तर्जालमाध्यमेन उच्चारणे अवरोहरोहक्रमं पृथक्कृत्वा सुस्पष्टरूपेण वेदपारायणमभवत् । अस्मिन् खलु प्रकल्पे अक्षरपरिवर्तन मात्रापरिवर्तनञ्च उच्चारणक्रमे अध्यापकेषु छात्रेषु मध्ये चर्चाया, विषयः भूयान् आसीत् ।

(5) अन्तर्जालमाध्यमेन सर्वत्र संस्कृत सर्वेषां मुख संस्कृतम्, ग्रामे-2 नागरे-2, संस्कृतवाणी प्रसरेदिति धिया संस्कृत भाषाशिक्षणप्रकल्पः विश्वविद्यालयीयाध्यापकैः सञ्चालितः। प्रकल्पेऽस्मिन् भाषा संभाषणभ्यासः प्रमुखः आसीत् गौणतया व्याकरणादिनियमानां संयोजन अपि अध्यापकै अकारि।

(6) अन्तर्जालमाध्यमद्वारा अनिषद्ग्रन्थनां वेदान्तविभाग द्वारा प्रस्तुतविधिना अनेकेषां खलु प्रकरणानां पंक्तिशः अध्यापनमभवत् प्रसङ्गेऽस्मिन् व्याकरणविषयाः अन्तर्जालमाध्येम अध्यापिताः अधीताश्च। श्रमणविद्यायाः विविधशृंखलामाध्यमेन अद्यावधि पर्यन्त पालिबौद्धविष्ज्ञयाणामन्तर्गाले अध्यनाध्यापनं क्रियमाणं विद्यते।

एतदतिरिच्यापि राष्ट्रीयशिक्षानीतिमादाय विश्वविद्यालयस्य अनेकेषां पाठ्यक्रमाणां विवर्धनाय बहुविधानि अन्तर्जानीयानि व्याख्यानानि अभवन् । सम्प्रति वैयक्तिरूपेण विश्वविद्यालये अधीयाना छात्राः अध्यापनरताश्च अध्यापकाश्च स्वयं MOOC प्रकल्पेन संपृक्ताश्च सन्ति, सम्प्रति विश्वविद्यालयस्तरे अतिनन्त्रीयशिक्षण प्रकल्पानां परस्परसमन्वयनाय विश्वविद्यालयः यतमानः विद्यते।